# Shiladakrita Chamaka Vidhana Varnanam

# શિલાદકૃતચમકવિધાનવર્ણનમ્

## Document Information

Text title : Shiladakrita Chamaka Vidhana Varnanam

File name : chamakavidhAnavarNanaMshilAdakRRita.itx

Category : shiva, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | harAkhyaH tRitIyAMshaH | pUrvArdham | adhyAyaH 34| 116-175 ||

Latest update : May 6, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 6, 2023

*sanskritdocuments.org*

# શિલાદકૃતચમકવિધાનવર્ણનમ્

નમો નમસ્તે ગિરિજાસહાય નમો નમસ્તે સુકૃતસ્વરૂપ ।
નમો નમસ્તેઽન્નપતે મહેશ નમો નમસ્તેઽસ્તુ નમો નમસ્તે ॥ ૧॥

ત્વત્પાદામ્બુજભક્તિર્મે નિશ્ચલા ભવતુ પ્રભો ।
ત્વમેવ શરણં શમ્ભો ગતિસ્ત્વં જગતાં પ્રભો ॥ ૨॥

કર્માણ્યસ્ય ફલોન્મુખાનિ ભગવંસ્ત્વત્પાદપદ્મં યતો
દૃષ્ટ્વા દોષવિવર્જિતં સુખયુતં યાવત્કરોતિ સ્વતઃ ।
તત્તાવન્મુનિવૃન્દમાનસમનઃપદ્મપ્રવિષ્ટં પ્રભો
તન્મે માનસપઙ્કજે ક્ષણમપિ સ્વામિન્ પ્રભો જાયતામ્ ॥ ૩॥ (મુદે જાયતામ્)

વાજશ્ચ મેઽસ્તુ પ્રસવશ્ચ મેઽસ્તુ ત્વત્પૂજયા સા પ્રયતિશ્ચ મેઽસ્તુ ।
મહેશ્વરાનુપ્રસિતિશ્ચ મેઽસ્તુ ધીતિશ્ચ મેઽસ્તુ ક્રતુરસ્તુ શમ્ભો ॥ ૪॥

સ્વરશ્ચ મેઽસ્તુ સ્વરદેશ શમ્ભો શ્લોકશ્ચ મેઽસ્તુ શ્રુતિગીતકીર્તે ।
શ્રાવશ્ચ મેઽસ્તુ શ્રુતિરસ્તુ શમ્ભો શિવાભિધાનશ્રવણાય નિત્યમ્ ॥ ૫॥

જ્યોતિશ્ચ મેઽસ્તુ જ્વલનસ્વરૂપ સુવશ્ચ મેઽસ્તુ ત્રિપુરાસુરારે ।
પ્રાણશ્ચ મે તાવદપાનયુક્તો વ્યાનશ્ચ મેઽસુવ તથૈવ ચિત્તમ્ ॥ ૬॥

આધીતં ચ તથા વાક્ચ મનશ્ચક્ષુશ્ચ મે પ્રભો ।
શ્રોત્રં દક્ષો બલઞ્ચૌઞ્જઃ સહશ્ચાયુશ્ચ મે પ્રભો ॥ ૭॥

જરા ચાત્મા ચ મે શમ્ભો તનૂઃ શર્મ ચ વર્મ ચ ।
અઙ્ગાન્યસ્થીનિ ભગવન્ પરૂંષિ ચ ભવન્તુ મે ॥ ૮॥

શરીરાણિ ભવન્ત્વીશ તાનિ રમ્યાણિ મે પ્રભો ।
જ્યૈષ્ઠ્યં ચ મેઽધિપત્યં ચ મન્યુર્ભામશ્ચ મે પ્રભો ॥ ૯॥

અમશ્ચામ્ભશ્ચ જેમા ચ મહિમા વરિમા ચ મે ।
પ્રથિમા ચાસ્તુ ગૌરીશ વર્ષ્મા ચ દ્રાઘુયા ચ મે ॥ ૧૦॥

વૃધ્દં વૃધ્દિશ્ચ સત્યં ચ શ્રધ્દા ચાસ્તુ જગત્રયે ।
ધનં વશાઽસ્ત્વિષિગ્ચાસ્તુ ક્રીડા મોદશ્ચ મે પ્રભો ॥ ૧૧॥

જાતં જનિષ્યમાણં ચ સૂક્તં મે સુકૃતં ચ મે ।
વિત્તં વેદ્યં ચ ભૂતં ચ ભવિષ્યચ્ચ સુગં ચ મે ॥ ૧૨॥

સુપથં ઋધ્દમૃધ્દિશ્ચ ક્લૃપ્તં ક્લૃપ્તિશ્ચ મે મતિઃ ।
સુમતિઃ શં મયશ્ચાસ્તુ પ્રિયં ચાસ્તુ શિવં શુભે ॥ ૧૩॥

અનુકામશ્ચ કામશ્ચ શમ્ભો સૌમનસં ચ મે ।
ભદ્રં શ્રેયશ્ચ વસ્યં ચ યશો મેઽસ્તુ જગત્રયે ॥ ૧૪॥

દ્રવિણં ચાસ્તુ યન્તા ચ ધર્તા ક્ષેમશ્ચ મે ધૃતિઃ ।
વિશ્વં મહશ્ચ સંવિચ્ચ જ્ઞાત્રં સૂશ્ચ પ્રસૂશ્ચ મે ॥ ૧૫॥

સીરં લય ઋતં ચાસ્તુ ભગવન્નમૃતં ચ મે ।
અયક્ષ્મં ચાનામયં ચ જીવાતુશ્ચાપિ મે સદા ॥ ૧૬॥

દીર્ઘાયુત્વાનમિત્રે ચ સર્વદાઽપ્યભયં ચ મે ।
સુગં ચ શયનં સૂષા સુદિનં ચાસ્તુ મે સદા ॥ ૧૭॥

ઊર્ક્ચ મે સૂનૃતા ચાસ્તુ પયશ્ચાસ્તુ રસશ્ચ મે ।
ઘૃતં મધુ ચ સગ્ધિશ્ચ સપીતિશ્ચ કૃષિશ્ચ મે ॥ ૧૮॥

વૃષ્ટિચ જૈત્રમૌદ્ભિદ્યં રયિશ્ચાસ્તુ સદાપિ મે ।
રાયઃ પુષ્ટં ચ પુષ્ટિશ્ચ વિભુ ચ પ્રભુ ચ પ્રભો ॥ ૧૯॥

બહુ ભૂયશ્ચ પૂર્ણં ચ તથા પૂર્ણતરં ચ મે ।
અક્ષિતિશ્ચાસ્તુ ભગવન્ કૂયવાશ્ચ ભવન્તુ મે ॥ ૨૦॥

અન્નમન્નપતે મેઽસ્તુ તેનાસ્ત્વક્ષુચ્ચ મે પ્રભો ।
વ્રીયશ્ચ યવા માષાઃ તિલા મુદ્ગાશ્ચ મે શિવ ॥ ૨૧॥

ખલ્વાશ્ચ સન્તુ ગોધૂમાઃ મસુરાશ્ચ પ્રિયઙ્ગવઃ ।
અણવઃ સન્તુ મે નિત્યં શ્યામાકાઃ સન્તુ મે પ્રભો ॥ ૨૨॥

નીવારાદ્યાશ્ચ મે સન્તુ ગૃહે સર્વાન્નકલ્પકાઃ ।
અશ્મા ચ મૃત્તિકા ચાસ્તુ ગિરયઃ પર્વતાશ્ચ મે ॥ ૨૩॥

સિકતાઃ સન્તુ ભગવન્ મે વનસ્પતયશ્ચ મે ।
હિરણ્યમસ્ત્વયશ્ચાસ્તુ તથા સીસં ત્રપુશ્ચ મે ॥ ૨૪॥

શ્યામં લોહં ચ મેઽગ્નિશ્ચ ગૃહે તિષ્ઠન્તુ સર્વદા ।
આપશ્ચ વીરુધઃ સન્તુ તથૈવૌષધયોઽપિ મે ॥ ૨૫॥

કૃષ્ટપચ્યં ચ બહુધા મમ તિષ્ઠતુ વેશ્મનિ ।
તથૈવાકૃષ્ટપચ્યં ચ વનસમ્ભવમસ્તુ મે ॥ ૨૬॥

ગોમહિષ્યાદયો ગ્રામ્યાઃ પશવઃ સન્તુ મે ગૃહે ।
સદા યજ્ઞેન કલ્પન્તામારણ્યાઃ પશવશ્ચ મે ॥ ૨૭॥

વિત્તં વિત્તિશ્ચ ભૂતં ચ ભૂતિશ્ચ વસતિર્વસુ ।
શિવપૂજાદિકં કર્મ શક્તિશ્ચ શિવપૂજને ॥ ૨૮॥

એમશ્ચાસ્તુ મમેતિશ્ચ ગતિશ્ચાસ્તુ શિવાર્ચને ।
અગ્નિરિન્દ્રશ્ચ સોમશ્ચ સવિતા ચ સરસ્વતી ॥ ૨૯॥

પૂષા બૃહસ્પતિર્મિત્રઃ ત્વષ્ટા ચ વરુણશ્ચ મે ।
ધાતા ચ વિષ્ણુરપ્યસ્તુ ગૃહકર્મકરસ્તુ મે ॥ ૩૦॥

અશ્વિનૌ ચ મમેશાન તિષ્ઠતાં સર્વદા ગૃહે ।
મરુતશ્ચ પ્રસર્પન્તુ વિશ્વેદેવાશ્ચ મે ગૃહે ॥ ૩૧॥

ત્વદાજ્ઞાવશગાનેતાન્ અગ્નીન્દ્રાદિસુરાન્ શિવ ।
મદ્વશાન્ કુરુ વિશ્વેશ દક્ષાન્ મદ્ગૃહકર્મણિ ॥ ૩૨॥

અન્તરિક્ષં ચ પૃથિવી દ્યૌરપ્યસ્તુ દિશશ્ચ મે ।
મૂર્ધા પ્રજાપતિશ્ચાસ્તુ મે ભવત્કૃપયા ભવ ॥ ૩૩॥

અંશુશ્ચ રશ્મિરપ્યસ્તુ મે દાભ્યોઽધિપતિશ્ચ મે ।
ઉપાંશુરન્તર્યામશ્ચ મમ સ્યાદૈન્દ્રવાયવઃ ॥ ૩૪॥

મે મૈત્રાવરુણશ્ચાસ્તુ તથૈવાસ્તુ મમાશ્વિનઃ ।
પ્રતિપ્રસ્થાનશુક્રૌ ચ મન્થી ચાગ્રયણશ્ચ મે ॥ ૩૫॥

વૈશ્વદેવો ધ્રુવશ્ચાપિ તથા વૈશ્વાનરશ્ચ મે ।
ઋતુગ્રહાશ્ચ મે સન્તુ સાતિગ્રાહ્યાશ્ચ શઙ્કર ॥ ૩૬॥

ઐન્દ્રાગ્ના વૈશ્વદેવશ્ચ ગ્રહાઃ સોમોપયોગિનઃ ।
તથા મરુત્વતીયાશ્ચ ગ્રહાઃ સન્તુ સદાઽપિ મે ॥ ૩૭॥

માહેન્દ્રશ્ચ તથાઽઽદિત્યઃ સાવિત્રશ્ચાસ્તુ મે ગ્રહઃ ।

સારસ્વતશ્ચ પૌષ્ણશ્ચ તથા પાત્નીવતશ્ચ મે ॥ ૩૮॥

સહારીયોજનશ્ચાસ્તુ મમેધ્મશ્ચાસ્તુ સર્વથા ।
બર્હિર્વેન્દિર્ધિષ્ણિયાશ્ચ સ્રુવશ્ચ ચમસાશ્ચ મે ॥ ૩૯॥

ગ્રાવાણઃ સ્વરવઃ સન્તુ તથૈવોપરવાશ્ચ મે ।
તે મે ધિષવણે સન્તુ તે દ્રોણકલશશ્ચ મે ॥ ૪૦॥

વાયવ્યાનિ ચ મે સન્તુ પૂતભૃચ્ચાસ્તુ મે પ્રભો ।
તથૈવાધવનીયશ્ચ તદાગ્નીધ્રં ચ મે પ્રભો ॥ ૪૧॥

હવિર્ધાનં ચ મે સ્વામિન્ ગૃહાશ્ચૈવ સદશ્ચ મે ।
પુરોડાશાશ્ચ મે સ્વામિન્ પચતાશ્ચ ભવન્તુ મે ॥ ૪૨॥

તથૈવાવભૃથઃ સન્તુ સ્વગાકારશ્ચ મે પ્રભો ।
અગ્નિર્ઘર્મશ્ચ મેઽર્કશ્ચ સૂર્યઃ પ્રાણશ્ચ મે પ્રભો ॥ ૪૩॥

અશ્વમેધશ્ચ પૃથિવી દ્યૌરપ્યદિતિરસ્તુ મે ।
મે શક્વરીરઙ્ગુલયો દિશશ્ચ વિદિશશ્ચ મે ॥ ૪૪॥

તથા યજ્ઞેન કલ્પન્તાં ઋક્ ચ સામ ચ મે પ્રભો ।
સોમો યજુશ્ચ દીક્ષા ચ તપશ્ચસ્તુ ઋતુશ્ચ મે ॥ ૪૫॥

તથાઽહોરાત્રયોર્વૃષ્ટ્યા વ્રતં ચ નિયમાત્મકમ્ ।
બૃહદ્રથન્તરે યજ્ઞે કલ્પેતાં ભાલલોચન ॥ ૪૬॥

ગર્ભા વત્સાશ્ચ ભગવન્ ત્ર્યવિશ્ચાસ્તુ મહેશ્વર ।
ત્ર્યવી ચ મે દિત્યવાટ્ ચ દિત્યૌહી ચ સદાશિવ ॥ ૪૭॥

પઞ્ચાવિશ્ચ મહાદેવ પઞ્ચાવી ચ ત્રિલોચન ।
ત્રિવત્સશ્ચ ત્રિવત્સા ચ તુર્યવાડસ્તુ મે પ્રભો ॥ ૪૮॥

તુર્યૌહી પષ્ટવાટ્ ચાસ્તુ પષ્ઠૌહી ચ મહેશ્વર ।
ઉક્ષા વશા ચ ઋષભો વેહોઽનડ્વાંસ્તથાસ્તુ મે ॥ ૪૯॥

ધેનુરપ્યસ્તુ ભગવન્ ક્ષીરાયાતિમનોહરા ।
યજ્ઞેન કલ્પતામાયુઃ પ્રાણો યજ્ઞેન કલ્પતામ્ ॥ ૫૦॥

અપાનોઽપિ સ યજ્ઞેન વ્યાનેન સહ કલ્પતામ્ ।
ચક્ષુઃ શ્રોત્રં ચ યજ્ઞેન મનસા સહ કલ્પતામ્ ॥ ૫૧॥

વાગાત્માપિ તથા યજ્ઞોઽપ્યેવં યજ્ઞેન કલ્પતામ્ ।
ત્વદધીનમિદં સર્વં તવેતિ પ્રાર્થિતં મયા ॥ ૫૨॥

સર્વસ્વતન્ત્રોઽસિ મહેશ યસ્માત્ ત્વમેવ દાતાઽસિ તવાપિ દેયાઃ ।
ઉક્તાશ્ચ તાવચ્ચમકેન દેહિ તાનસ્વતન્ત્રાન્ શિવપૂજકાય ॥ ૫૩॥

તેષાં પ્રદેયત્વવિનિશ્ચયેન તાન્ દેહિ માં શિવપૂજકાય ।
તે તાવદસ્મદ્ગૃહકર્મયોગ્યાઃ યોગ્યેન યોગ્યસ્ય કિલાન્ચવોઽપિ ॥ ૫૪॥

એતે પદાર્થાઃ પ્રથિતાસ્ત્વદીયાઃ તે શર્વ દેયાસ્તવ દાનયોગ્યાઃ ।
અહં શિવરાધનસક્તચિત્તઃ કો વા મદન્યોઽસ્તિ સ દાનયોગ્યઃ ॥ ૫૫॥

દાતાપિ દેયં સતિ દાનયોગ્યે વિહાય કસ્મૈ પ્રદદાતિ ભક્ત્યા ।
વિદ્વાનતો દેહિ મહેશ તાન્ મે લોકે મદન્યસ્તુ ન કોઽપિ પાત્રમ્ ॥ ૫૬॥

ત્વદ્દત્તમેતાદૃશભાગ્યમેત્ય ત્વત્પાદપૂજાનિરતો ભવામિ ।
પ્રમાદલેશોઽપિ તદા ન ભાવી ભવે ભવે ત્વત્પદપૂજકસ્ય ॥ ૫૭॥

મન્યે શઙ્કર દેવદેવ ભવતો દાતૃત્વમવ્યાહતે (તવ તે દાતૃત્વમવ્યાહતે)
    તેનાગ્નિપ્રમુખાન્ સુરાનપિ સદા તાનસ્વતન્ત્રાન્ સ્વતઃ ।
મહ્યં દેહિ મદિચ્છયા પરમમી કુર્વન્તુ કૃત્યાનિ મે
    શક્તિર્યસ્ય યથા તથાઽસ્તિ ભગવન્ સર્વસ્વતન્ત્ર પ્રભો ॥ ૫૮॥

મહાપ્રભુઃ શમ્ભુરુમાસહાયો દયામયો ભૂતિમયોઽપિ દાતા ।
માતા પિતા મે સહિતપ્રદાતા ધાતા વિધાતા ન સન્દૃક્ (?) ॥ ૫૯॥ (પરમોઽત્ર સન્દૃક્)

દેયત્વેન વિનિશ્ચિતાસ્તવ સુરાઃ સર્વેઽપિ વેદૈરમી
    દાતા ત્વં તવ ભાગ્યમપ્યવિલયં ભૂયઃ સમુજ્જૃમ્ભતે ।
અસ્માકં તુ મહાપ્રભુઃ ભવ ભવાનેવેતિ ચિત્તં મુહુઃ
    સ્વાનન્દામ્બુધિવીચિકાઽતિચપલા લીલાવિલાસાસ્પદમ્ ॥ ૬૦॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે શિલાદકૃતચમકવિધાનવર્ણનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । હરાખ્યઃ તૃતીયાંશઃ । પૂર્વાર્ધમ્ । અધ્યાયઃ ૩૪। ૧૧૬-૧૭૫ ॥

- .. shrIshivarahasyam . harAkhyaH tRRitIyAMshaH . pUrvArdham . adhyAyaH 34. 116-175 ..

Proofread by Ruma Dewan

*Shiladakrita Chamaka Vidhana Varnanam*
pdf was typeset on May 6, 2023

Please send corrections to *sanskrit@cheerful.com*